SHODHPATRA: INTERNATIONAL JOURNAL OF SCIENCE AND HUMANITIES
E-ISSN: 3048-6041 | Volume- 3, Issue- 2 | February 2026

# शब्दब्रह्मणः शक्तिमतानां भेदादिविचारः

**विशाल शर्मा [1], डॉ. श्रीनाथधर द्विवेदी [2]**
[1] शोधच्छात्रः, केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः
[2] सहायक आचार्य, केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः

**शोधसारः-**

वाक्यं च पदं च इति वाक्यपदे, ते अधिकृत्य कृतं शास्त्रम् इति निर्वचनं वाक्यपदीयशब्दस्य अस्ति। अत्र 'शिशुकन्द्र'[1] इति सूत्रेण छप्रत्ययः भवति। एवम् अन्वर्थनामा ग्रन्थः असौ मीमांसाशास्त्रीयं वाक्यविज्ञानं शब्दशास्त्रीयं पदविज्ञानं च व्याख्यातुं समं प्रसरति। अथ च वेदान्तशास्त्रीयं जगद्ब्रह्मैक्यविज्ञानमपि शब्दव्याख्यामाध्यमेन अत्र गुम्फितम् इत्यपरमस्य वैशिष्ट्यम् अस्ति। भर्तृहरेः पूर्व पाणिनीयं व्याकरणमिदं शब्दसिद्धिकरं शास्त्रमासीत् केवलं लोके विश्रुतम्। यद्यपि व्याडिविरचिते संग्रहग्रन्थे सर्वेऽपि दार्शनिकपक्षाः दर्शिताः। त्रिमुन्यन्यतमेन पतञ्जलिना महाभाष्ये यत्र तत्र दर्शनशास्त्रीया अपि विषयाः समारोपिताः सन्ति, परं 'व्याकरणं दर्शनम्' इति रूपेणानुज्ञानं नासीत् वाक्यपदीयात् पूर्वम्। अयमस्ति सर्वतः पूर्वं भर्तृहरेरनुग्रहो यत् व्याकरणमिदम् अपरं दर्शनमिति रूपेण प्रतिज्ञातं वर्तते। अस्मिन् शोधपत्रे शब्दब्रह्मणः स्वरूपम्, तथा च शब्दशक्तिमतानां भेदादिविचाराणां विषये प्रतिपाद्यते। शक्तिमतेषु षड्भावविकाराणां प्रासङ्गिकता इत्यादयः पक्षाः अत्र प्रस्तूयन्ते।

**साङ्केतिकशब्दाः-** शब्दब्रह्म, शक्तिः, वाक्यपदीयम्, दर्शनम्, कालः, व्यवहारः, भेदः, अभेदः।

## प्रस्तावना

पुरा परमकारुणिकः महर्षिपाणिनिः अष्टाध्यायीनामकं व्याकरणग्रन्थं रचितवान्। यद्यपि सूत्रेष्वेव हि सर्वव्याकरणतत्त्वं समाविष्टमासीत्, तथापि मन्दमतीनां कृते महर्षिः कात्यायनः वार्त्तिकग्रन्थं रचयामास। अथ व्याकरणतत्त्वस्य विस्तररूपेण ज्ञानाय महर्षिणाव्याडिना संग्रहाख्यो महत्तमः ग्रन्थो रचितः वर्तते। व्याडिविरचितः संग्रहाख्यः ग्रन्थविशेषः लक्ष्यश्लोकात्मकः च आसीत्, यत्र सर्वेऽपि दार्शनिकपक्षाः स्पष्टमुक्ताः आसन्। किन्तु कालमहिम्नाऽसौ ग्रन्थः नष्टये जातः, इदानीं न लभ्यते। तदनु कुण्यादिभिः वृत्त्यादिग्रन्थाः कृताः। अथ व्याकरणशास्त्रस्य आवश्यकतां समवलोक्य महर्षिः पतञ्जलिः सर्वविधपूर्णमहाभाष्यं रचितवान्। महाभाष्यमाकरग्रन्थो भवति, तत्र नाना विषयाः वर्णिताः सन्ति, तथापि भाष्याब्धिः अति गम्भीरः भवति। अनायासेन तदर्थाः वोढुमशक्याः भवन्ति। अतः संक्षेपरुचीन् विदुषः प्राप्य संग्रहादिके अस्तंगते, महाभाष्ये च ग्रन्थमात्रे स्थिते सति चन्द्राचार्यवसुरातादिभिः आगमग्रथस्य पुनः उद्धारः कृतः। अनन्तरं श्री भर्तृहरिः महाभाष्यादिकम् आलोक्य, सर्वमागमशास्त्रञ्च स्वगुरोरधीत्य वाक्यपदीयनामकं ग्रन्थं अकरोत् ।

व्याकरणशास्त्रे येऽपि दार्शनिका विषयाः, यथा वचनं, पुरुषः, कालः, दिक् इत्यादयः अमीषां सर्वेषामपि

*Corresponding Author Email: Vishalsharma21j@gmail.com
Published: 14 February 2026
DOI: https://doi.org/10.70558/SPIJSH.2026.v3.i2.45537
Copyright © 2026 The Author(s). This work is licensed under a Creative Commons Attribution 4.0 International License (CC BY 4.0).

[1] अष्टाध्यायी- 04-03-88

अनितरसाधरणं विवरणं परिभाषणं प्रदत्तं वर्तते। इयमस्ति भर्तृहरेरेव ख्यातिः यत् तदनन्तरं किन्नाम प्राच्यवैयाकरणाः, किञ्चापि नाम नव्यवैयाकरणास्ते सर्वेऽपि सश्रद्धं सबहुमानं भर्तृहरिकृतिमुद्धृतवन्तः। "*नासीदन्याः गतिस्तत्समक्षम् ऋते भर्तृहरिग्रन्थोद्धरणात्*"[2]

वाक्यपदीयस्य ब्रह्मकाण्डे शब्दब्रह्मणः सिद्धिरिति पुनरपरं ग्रन्थस्यास्य वैशिष्ट्यं विद्यते। इतः पूर्वं पतञ्जलिविरचिते महाभाष्ये काश्चन पङ्क्यः स्फोटविषये लिखिताः । केवलं ताः पंक्तीराश्रित्य भर्तृहरिणा शब्दब्रह्मविषयकः ग्रन्थः निर्मितः। ग्रन्थनिर्माणे तस्मिन् भर्तृहरिः वेदान्तशास्त्रस्य साहाय्यमगृहणात्। तथापि तस्य स्फुटं सन्दृश्यत एव। भर्तृहरिविरचितं शब्दब्रह्मस्वरूपं सर्वथा शब्दशास्त्रानुरूप्यं भजते ।

**शब्दब्रह्म**

बृहयति पालयतीति ब्रह्म, स्वचैतन्यसम्पादनद्वारा जगदुद्भवस्थितिसंहारकारणम्, जगद्व्यवहारस्थितिनियामकं[3] यत्, तद् ब्रह्म। "यतो वा इमानि भूतानि जायन्ते[4], येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म" इत्यादिश्रुतिभिः तदेव प्रोच्यते। एतल्लक्षणं शब्दरूपे ब्रह्मण्यपि नितरां संघटते। वाचः ब्रह्मत्वविषयेऽपि श्रुतिषु पर्याप्तं प्रतिपादितमस्ति। तथाहि- वागेव विश्वा भुवनानि जज्ञे वाग्वै ब्रह्म वाग्धि ब्रह्म इति। नामरूपात्कं सर्व जगत् वर्तते। सर्वत्र यथा वेदान्तप्रतिपदितस्य ब्रह्मणः अनुवेधः वर्तते तथैव सर्वत्र शब्दानुवेधो भवत्येव। तदुक्तं-[5]

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**

**अनुविद्धमिव ज्ञानं सर्वं शब्देन भाषते ।।**

अतः शब्द एवं ब्रह्म इति वैयाकरणसिद्धान्तो भवति। एतदेव ओमित्येकाक्षरं ब्रह्म इति श्रुत्याऽपि उच्यते। जगदुपादानकारणं ब्रह्म एकं सत्यं चिरूपम् अद्वितीयं विद्यते। तस्यैव ब्रह्मणः विद्वांसः भिन्नभिन्नरूपेण प्रतिपादनं कुर्वन्ति। तदुक्तं वाक्यपदीय-[6]

**तदेकं प्रक्रिया भेदैः बहुधाः प्रविभज्यते।।**

एतस्यैव शब्दब्रह्मणः अङ्ङ्गोपाङ्ङ्गयुक्तं सम्पूर्णेऽपि वाक्यपदीयस्य प्रथमकाण्डे श्रीभर्तृहरिः निरूपणं कृतवान्।

**शब्दब्रह्मस्वरूपम्**

वाक्यपदीयस्य ब्रह्मकाण्डे ब्रह्मणः निरूपणं विद्यते इति। तस्य ब्रह्मण स्वरूपं कीदृशमिति? शब्दब्रह्म इत्यस्य शब्दस्वरूपं ब्रह्म, शब्दात्मकं वा ब्रह्म इति ह्यभिधेयार्थः भवति। यथा वेदान्तशास्त्रे सच्चिदानन्दं ब्रह्मम् इत्यस्य सत्स्वरूपम्, चित्स्वरूपम्, आनन्दस्वरूपं ब्रह्म इत्यर्थोऽभिधीयते, तथा ब्रह्मम् इत्यस्य सत्स्वरूपम्, चित्स्वरूपम्, आनन्दस्वरूपं ब्रहा इत्यर्थोऽभिधीयते, तथा वाक्यपदीयेऽस्मिन् शब्दस्वरूपताऽस्ति ब्रह्मणः इति प्रतिज्ञायते। प्रसङ्गेऽस्मिन् शब्दोऽयं नास्ति लौकिकः शब्दः, अपितु सर्वोच्चस्तरीयः परारूपात्मकः, यत्र शब्दार्थयोर्भेदः शममुपयाति। वेदान्तशास्त्रे प्रोच्यते यदस्माभिः सदसतोः भेद उपलभ्यते चिदचितोश्चापि जडचेतनरूपेण एव। आनन्दनिरानन्दयोश्चापि सुखदुःखरूपेण भेदोऽवधार्यते। परं यस्मिन् स्तरे भवत्यमीषाम् ऐक्यम्-सदेव न तु कदाचित् असत्, चिदेव न तु कदाचित् अचित्, आनन्द एवं न तु कदापि

[2] वाक्यपदीयम्- ब्रह्मकाण्डम्

[3] वाक्यपदीयम्- ब्रह्मकाण्डम्

[4] तैत्तिरीयोपनिषद्, 3-1-1

[5] वाक्यपदीयम्- ब्रह्मकाण्डम्

[6] वाक्यपदीयम्- ब्रह्मकाण्डम्

निरानन्दता। एवं सम्पद्यत एषां निष्प्रतिद्वन्द्विकता, तदेवास्ति ब्रह्मरूपता इति।

भर्तृहरिः प्रसङ्गेऽस्मिन् ब्रह्मणः शब्दस्वरूपताम् अपि बोधयति। यस्मिन् स्तरे शब्दार्थयोर्भेदः विलुप्यते। एवं च शब्द एवास्ति परास्वरूपात्मकः, न तु तस्माद् भिन्नोऽर्थः, तत्स्वरूपम् अस्ति इदं ब्रह्म। ब्रह्मण स्वरूपविषये तैत्तिरीयोपनिषदि यदुक्तम्- यतां वा इमानि भूतानि जातानि, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्राह्म इति तदेव वैयाकरणमते अपि लक्षणं भवति। श्रीभर्तृहरिः वाक्यपदीयग्रन्थस्य प्रारम्भे एवमेव उच्यते- अनादिनिधनमित्यादिना। शब्दतत्वात्मकं ब्रह्म अपि अनादिनिधनम् उत्पादविनाशरहितम्, अविनाशि भवति। एतस्मादेव शब्दब्रह्मणः जगतः प्रक्रिया जन्मस्थितिभङ्गगरूपावस्थाभेदः भवति। शब्दब्रह्मण एव घटपटाद्यर्थभावेन उतपत्तिः भवति। उत्पत्तिरपि विवर्त भवेनैव, पुनः अन्ते तत्रैव सर्व लयं प्राप्नोति।

अर्थममुं व्याचक्षाणः भर्तृहरिः शब्दस्य भेदचतुष्टयं प्रतिजानीते व्यख्यातृदृष्ट्या। प्रथमो भेदः वैखरी, यः शब्दोऽस्माभिरुद्यते श्रूयते च। द्वितीयः मध्यमा, यः अन्तःकरणे अस्माभिश्चिन्त्यते। अस्मिन् स्तरे शब्दार्थयोर्भेदः किञ्चित् क्षीणतामेति। अस्माभिरस्यां स्थिती मानसौ एवं सूर्याचन्द्रमसौ चिन्त्येते। तृतीयः पश्यन्ती, स्तरेऽस्मिन् शब्दार्थयोरैक्यं योगिभिरवधार्यते। चतुर्थः परारूपो भेदः, स्तरेऽस्मिन् सर्वाऽप्यर्थरूपता शब्दे प्रविलीयते। सर्वथा निष्प्रतिद्वन्द्रिकता-प्रत्यस्तमितभेदरूपता सम्भवति। एपैव शब्दब्रह्मस्वरूपता भर्तृहरिणा प्रोच्यते।

यद्यपि भर्तृहरिः मुखतः वाच त्रित्वं स्वीकरोति। तदुक्तं त्रय्या वाचः परं पदम्, किन्तु अन्यत्र महाभाष्यादी चत्वारि वाक्परिमिता पदानि इत्यादिरूपेण, अन्यत्र परा वाङ्कूलचक्रस्था इत्यादिरूपेणवर्णनात् भर्तृहरेरपि चतुष्टपक्षः सम्मतः इति ज्ञेयम्। वेदान्तशास्त्रे प्रतिज्ञायते यत् चिद्रूपताऽस्ति ब्रह्मरूपता, अचिद्रूपता तूपाधिः। आनन्दस्वरूपता ब्रह्मरूपता, निरानन्दस्वरूपता त्वस्या उपाधिः। उपाधिं विना उपधेयः नैव शक्यते द्रष्टुम्। परमनुमितिस्तु शक्यते कर्तुं यत् प्रकाश्यं विना केवलं प्रकाशस्वरूपः कश्चन स्यादिति। एवं च यदस्ति उपाधिभिः सर्वथाऽसंस्पृष्टं निरुपहितं तदेव ब्रह्म। शब्दब्रह्मप्रसङ्गेऽपि शब्दस्वरूपता ब्रह्मस्वरूपता, अर्थरूपता तूपाधिः। यदाऽपि शब्दार्थयोर्भेदः, नामरूपयोवैलक्षण्यं वाऽपहीयते, तदा भवति परास्वरूपता ब्रह्मरूपता। शब्दार्थयोर्विभेदविलोपस्य स्तरे अनुमितिरस्माभिः शक्यते। तस्य स्पष्टं प्रत्यक्षन्तु समाध्यनन्तरमेव। भर्तृहरिणा शब्दब्रह्मस्वरूपता सर्वथा वेदान्तसम्मता प्रतिपादिता। वेदान्तस्यायमाशयः यत् सर्वद्वन्द्वविलोपे यदैक्यं सैव ब्रह्मस्वरूपता। चिदचितोरिव शब्दार्थयोरप्यस्ति द्वन्द्वः, सोऽपि परास्वरूपतायां सन्मात्ररूपताम् अक्षरभावम् उपयाति। एक्स सच्चिदानन्दानन्ताद्वयम्, अथ च शब्दाक्षरस्वरूपमपि ब्रह्म सहैव भवति, इति व्याकरणवेदान्तपरिशीलकपरिशीलितोऽर्थः स्वीक्रियते।

**शक्तिशक्तिमतयोः भेदादिवचारः**

अनादिनिधनम् इत्यादिकारिकव्याजेन शब्दब्रह्मविषयक विभिन्नं तथ्यम् इति। तस्य ब्रह्मणः शक्त्यादिविषयं जानीमः। ब्रह्मणः शक्तिः केति जिज्ञासायाम् उच्यते शब्दब्रहाणः कालाख्या शक्तिः भवति। यद्यपि शक्तिः भिन्ना, तया शक्त्या युक्तः किञ्चन शक्तिमत् भवति इति वक्तुं शक्यते। तथापि शक्तिः कदापि शक्तिमदतिरिच्य न तिष्ठति। शक्तिं विना न कश्चन शक्तिमान्। नैव च शक्तिद्विना शक्तेरुपलब्धिरिति। अतः शक्तिशक्तिमतौरैक्यं स्वीक्रियते। शब्दब्रह्मणः शक्तिः उपाधिकारणात् एकाऽपि भिद्यते। षड्भावविकाराः भावभेदस्य योनयः भवन्ति। शक्तीनां भेदात् ब्रह्म अपि भोक्त्रादिरूपेण उपलभ्यन्ते। एतत् सर्व भवान् अग्रे पठतु।

**शक्तिमतयोः अभेदः**

इह लोके जलं हिमरूपेण, कलिका पुष्पररूपेण, स्वर्ण कुण्डलरूपेण च परिवर्तमानाः प्रतिभान्ति। ते हि भिन्नाधेयवशात् भिन्नशक्तिभिः सञ्चाल्यमानाः प्रतीयन्ते। परं वस्तुतः सर्वत्र शक्तित्वमेकमेव। यथा कटककुण्डलादिप्रसंगे

स्वर्णस्यैक्यम्, यथा च आवर्ततरङ्गादिप्रसङ्गे तदुपादानस्य जलस्यैक्यम्, एवं सर्वेषां कार्याणां प्रसङ्ग उपादानशक्तेर्वस्तुत ऐक्यमेव। उपाधिभेदातु शक्तिभेदः प्रतिभाति। यद्यपि शब्दब्रह्मणः एका अखण्डा कालशक्तिः भवतिः किन्तु घटित्रुट्याद्युपाधिवशाद् सा नाना शक्तिर्भवति। अत एव विविधशक्त्याश्रयात् तद् ब्रह्म अपि भिन्नं भवति, भोक्तृवादिरूपेण तस्य स्थितिर्भवति। वस्तुतः शक्तिमतोरैक्यं भवति। शक्तिमत् पदार्थः कदापि शक्तिभ्यः पृथक् न भवति, अविदुषां कृते पृथगिव भाति। शक्तयः नैव कदाचित् ब्रह्मव्यतिरिक्ता स्थातुमर्हन्ति। अतः शक्तिशक्तिमतोरैक्यं भवतीति ज्ञातव्यम्।

**षड् भावविकाराः**

जगतः सन्ति षट् भावविकारा इति सर्वप्रथमं निरुक्तकारः यास्कः प्रत्यपादयत्- षट् भावविकाराः भवन्ति इति वायर्यायणिः। जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति इति षड्भावविकाराः। वस्तुत एतेष्वेव षड्‌ धातुपाठस्य सर्वेऽपि धातवः चरितार्थतां गताः। उत्पत्तिरत्र जायते शब्देनाभिप्रेता, स्थितिस्तु अस्ति शब्देन । याऽपि हि काचन गतिः, सा सर्वा विपरिणामे समाक्रान्ता। यदपि हि किञ्चन वृद्धिमुपयाति तत्प्रोक्तं वर्धते शब्देन। क्षरणम् अपक्षीयते शब्देन, विनाशस्तु विनश्यति इति क्रियाभिधानेन। इदमत्रावधीयम् शब्दब्रह्मणः एका स्वतन्त्र कालशक्तिः भवति। किन्तु तस्यां अनेकाः घटीपलादयः कलाः आरोपिताः सन्ति। अतः उपाधिभेदात् विभिन्नाः शक्तयः भवन्ति। पदार्थभेदस्य योनयः जन्मादयः षड्भावविकाराः कालशक्तिद्वारैव नियन्त्रिताः भवन्ति। अत एव च नाना शक्तिसम्बन्धात् एकं ब्रह्म सर्वव्यवहारहेतुत्वं भजते। तदा तदेव ब्रह्म भोक्तृरूपेण, भोगरूपेण भोक्तव्यरूपेण च स्थितं भवति इति।

**शब्दब्रह्मणः शक्तिः**

शब्दब्रह्मणः सर्वव्यवहारहेतुत्वम् परमार्थदशायां सच्चिदानन्दानन्ताद्वयम् एकमेव ब्रहा इति पश्चातु व्यवहारदशायां कर्तृकर्मभेदेन साध्यसाधनभेदेन च भवति भेदः। भेदोऽयं नास्ति तात्त्विकः, अपितु अनिर्वचनीयरूपः। यतो हि भेदे अभेदः समुपलभ्यते। अभेदेऽपि च भेदः। भिन्नेषु गोद्रव्येषु अभेदरूपं गोत्वम् उपलभ्यते। अभिन्नगोत्वपरिच्छिन्नाः भिन्नाः गाव इत्यपि भवन्ति। एवं भेदरचाभेदश्च व्याकुलितः परस्परम्। भेदाभेदौ परस्परविरुद्धौ एकत्र स्थीयेते। तथापि लोकव्यवहाराय द्विविधः प्रयोगः समम् अस्माभिर्विधीयते। एवं सिद्धमेतत् यत् परमार्थीत एकमपि तत्त्वं व्यवहाराय बहुधा विभज्यते। भोक्रादिरूपेण विवर्तते।

ब्रह्मणः कालशक्तिरेकैव। प्रायशस्सर्वेऽपि दार्शनिकाः कालमेक नित्यं विभुं च प्रवदन्ति, तथापि जनाः कदापि तथाभूतम् एकं नित्यं कालं न अनुभवन्ति। तत्र काले अनेके अवान्तरभेदाः भवन्ति। त्रटिक्षणनिमेषदिनरात्रिपक्षमासर्तुवर्षादयः नाना भेदाः भवन्ति कालस्य। एवज उपाधिभिः परिच्छिन्नम् अनित्यं कालमाश्रित्य पदार्थानां षट् विकाराः भवन्ति। इयं विकारभिन्नतैव पदार्थभेदस्य कारणम्। परिच्छिन्नकालोपाधिवशात् कश्चन पदार्थः कस्मिंश्चित् परिकल्पिते कालविशेषे उत्पद्यमानः, कश्चितु अपक्षीयमाणः प्रतीयते। सर्वत्र उपाधिरेव भेदकारणम्।

कालशक्तेरनुज्ञां विना किमपि कार्य न भवति। नहि शरदि कदापि कोकिलो क्, कू शब्दं करोति। यतोहि कालशक्तिः कोकिलाय कूजनाय नानुमतिं ददाति । आगते वसन्ते पुनश्च रौति कोकिलः। एवज कालशक्तिमाश्रित्य एव जति सर्वाः क्रियाः भवन्ति। तत्तत्काले एव जन्मादयः क्रियाः भवन्ति, एताः एव क्रियाः भावानां भेदस्य कारणानि भवन्ति। तस्य ब्रह्मणः प्राप्त्युपायोऽनुकारश्च वेदः इति अग्रिमेण सम्बन्धः।

**एकस्य सर्वबीजस्य यस्य चेयमनेकधा।**
**भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः ॥**[7]

[7] वाक्यपदीयम्- ब्रह्मकाण्डम्- 04

ब्रह्म एकः एव भवति। तदुक्तम् एकमेवाद्वितीयं ब्रह्म इति। तत्र सजातीयविजातीयस्वगतभेदाः न भवन्ति। तस्य ब्रह्मणः एका कालशक्तिः भवति। सा च एकाऽपि उपाधिभेदात् विभिन्नाः भवन्ति। यदा च शक्तिः नाना रूपं धारयन्ति। तदा शक्तिमत् ब्रह्म अपि भिन्न भिन्नं भवति। ब्रह्म सर्वेषामर्थानां बीजं भवति। अत उपादानकारणं भवति। लोकव्यवहाराय च तस्यैव ब्रह्मणः अनेकधा नाना रूपं परस्परं विलक्षणं स्वरूपम् उपलभ्यते। तदेव ब्रह्म कदाचित् भोक्तृरूपेण, कर्तृरूपेण वा स्थितो भवति। कदाचित् भोक्तव्यकर्मरूपेण ज्ञायते। कदाचिच्च भोगरूपेण क्रियारूपेण दृश्यते।

**उपसंहारः**

सर्वोऽपि मनुष्याः भोगविषयम् अन्नादिकं भोक्तव्यरूपेण मन्वते। तदेवान्नादिकं रुधिरभावं प्राप्य मस्तिष्कसदेशं गत्वा अहम् इति संवेदनां जनयति। तस्मिन् समये तत् भोक्ताऽहमिति वदति। पश्चात् कदाचित्तद् अन्नादिरूपेण परिणतो भूत्वा भोक्तव्यतामुपयाति। अस्यां स्थितौ मनुष्याणां निदर्शनं यद् विविधं रूपं विविधेषु कालेषु परिणमति। तत् पूर्वभावं जहाति, अपरभावं च आसादयति। वाक्यपदीयकाराणान्तु निदर्शनं यत् सर्वदा एकमेव रूपं विविधरूपेषु सम्प्रतीयते। यथा सर्वेष्वपि कालेषु रज्जुरेव। सर्पस्तु किशितकालाय प्रतीयत एव केवलम्। एवमेव ब्रह्म एव भोक्त्रादिरूपेण वर्तते इति भावः। अस्योपि सम्बन्धः तस्य प्राप्त्युपायो वेदः इत्यनेन।अनेन रूपेण शब्दब्रह्मणः स्वरूपम्, शक्तिविचारश्च भर्तृहरिणा स्वग्रन्थे प्रतिपादितमस्ति।

**सन्दर्भग्रन्थसूची-**

1. मीमांसक, युधिष्ठिर. (1980). संस्कृत व्याकरण शास्त्र का इतिहास। रामलाल कपूर ट्रस्ट, बहालगढ़।
2. चतुर्वेदी, रामस्वरूप. (1990). भर्तृहरि का भाषादर्शन। चौखम्बा विद्याभवन, वाराणसी।
3. भर्तृहरि. (1965). वाक्यपदीयम् (प्रथम काण्डः)। के. ए. सुब्रह्मण्यम अय्यर। डेक्कन कॉलेज, पुणे।
4. भर्तृहरि. (1971). वाक्यपदीयम् (प्रथम एवं द्वितीय काण्डः)। के. राघवन पिल्लै । मोतीलाल बनारसीदास, दिल्ली।
5. भर्तृहरि. वाक्यपदीयम् (ब्रह्मकाण्डम्, स्वोपज्ञवृत्तिसहितः)। चौखम्बा संस्कृत संस्थान, वाराणसी।